# Dvijaprokta Darshanoparanta Shiva Stuti 2

# द्विजप्रोक्ता दर्शनोपरान्त शिवस्तुतिः २

## Document Information

Text title : Dvijaprokta Darshanoparanta Shiva Stuti 2

File name : dvijaproktAdarshanoparAntashivastutiH2.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| vAvRittasholkAH||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# द्विजप्रोक्ता दर्शनोपरान्त शिवस्तुतिः २

(शिवरहस्यान्तर्गते उग्राख्ये)

- -

तदानीं श्रीमहादेवः करुणासागरः प्रभुः ।
आविरासीद्वृषारूढः शिवाश्लिष्टवपुः शिवः ॥ ८० ॥

शशाम शीतलो जातः प्रवज्लन्नपि पावकः ।
स ददर्श ततः शम्भुं नानाप्रमथसेवितम् ॥ ८१ ॥

उमासंश्लिष्टवामाङ्गं वृषभारूढमव्ययम् ।
सोमसूर्याग्निनयनं सोमार्धकृतशेखरम् ॥ ८२ ॥

अभयप्रदमीशानं चेकितानमजं विभुम् ।
अनन्तचन्द्रप्रतिममनन्तरविसन्निभम् ॥ ८३ ॥

अनन्तवह्निप्रतिमं वस्तुतोऽप्रतिमं शिवम् ।
अतिसुन्दरमीशानममेयगुणसंश्रयम् ॥ ८४ ॥

मन्दारमालासंवीतं वृन्दारकगणार्चितम् ।
एतादृशं शिवं दृष्ट्वा प्रहृष्टहृदयो द्विजः ॥ ८५ ॥

मूर्धन्यञ्जलिमाधाय प्राह शम्भुं शिवार्चकः ॥ ८९ ॥

- -

द्विजः उवाच -
दानपात्रमहं शम्भो दानकालोऽयमीश्वर ।
दाता त्वन्नेतरो याच्यो याच्या भक्तिस्त्वयि प्रभो ॥ ९९ ॥

न याचे न याचे महादेव शम्भो
वरानन्यदेवानहं भक्तबन्धो ।
परन्त्वेकरूपां मदन्यैरलभ्यां
भवद्भक्तिमेकां परामीश याचे ॥ १०० ॥

यथैवेश भक्त्या तृणीकृत्य सर्वा-
नुपेन्द्रादिदेवानहं सर्वथापि ।
त्वदर्चापरो नित्यमव्यग्रचित्तो
निरातङ्कमेवं भवन्तं भजामि ॥ १०१॥

तवैतत्पदद्वन्द्वमिन्द्रादिवन्द्यं
सदोपेन्द्रहृत्पङ्कजारूढमीड्यम् ।
ममापि स्फुरवीश हृत्पद्ममध्ये
मुकुन्दाक्षिपद्मार्चितं वेदवेद्यम् ॥ १०२॥

महादेव विश्वेश विश्वैकवन्द्य
स्मरारे पुरारे महापातकारे ।
महेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैषा ॥ १०३॥

विभो देव देवेश गौरीश शम्भो
यमारे गजारे भवारेऽन्धकारे ।
शिवेशेति नानामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०४॥

उमाकान्त मौनेन्द्रविश्रामहेतो
जगज्जीवनानन्दधर्मैसेतो ।
निरीहेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०५॥

निराकार निर्लिप्त चन्द्रार्धमौले
मुकुन्दादिवृन्दारकाराध्यमूर्ते ।
परेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०६॥

मुनिस्वान्तपद्मप्रबोधैकभानो
स्फुरत्भालभागोत्थलीलाकृशानो ।
गिरीशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०७॥

गुणातीत कल्याणनानागुणाब्धे

वृषाधीशकेतो महापुण्यहेतो ।
सुरेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०८॥

कृपापात्र चन्द्रानलोष्णांशुनेत्र
स्वभक्तैकमित्राद्रिकन्याकलत्र ।
उमेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १०९॥

शिव श्रीपतिस्वच्छनेत्रारविन्द-
स्फुरत्पादपद्मामितानन्तभोग ।
कृपाब्धेति (गिरीशेति) नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ ११०॥

हरामेय निर्द्वन्द्व वेदान्तवेद्य
त्रिशूलिन्नुमाकान्त कर्पूरगौर ।
निरागेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैपा ॥ १११॥

॥ इति शिवरहस्यान्तर्गते द्विजप्रोक्ता दर्शनोपरान्त शिवस्तुतिः २ सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २५। वावृत्तश्लोकाः॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . vAvRRittashlokAH..

Proofread by Ruma Dewan

*Dvijaprokta Darshanoparanta Shiva Stuti 2*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*